# Rama Geeta Govinda

# રામગીતગોવિન્દમ્

## Document Information

Text title : Rama Geeta Govinda

File name : rAmagItagovindam.itx

Category : raama, kRitI, gItam, aShTaka

Location : doc_raama

Author : Jayadeva Kavi

Transliterated by : Keshavchaitanya Kunte

Proofread by : Keshavchaitanya Kunte

Latest update : July 9, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 9, 2023

*sanskritdocuments.org*

# રામગીતગોવિન્દમ્

(કવિ જયદેવવિરચિતં રાગકાવ્યમ્)

॥ શ્રીઃ ॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીરામચન્દ્રાય નમઃ ॥

## પ્રથમસર્ગઃ ૧ સાનન્દરઘુનન્દનઃ

## અષ્ટપદી ૧ ગીતં પ્રથમમ્

જય જય રામ! હરે ॥ ધ્રૃ.॥

સ્મૃતિવેદાદ્યુદ્ધારક જનતારક એ ।
શઙ્ખસુમન સુરવન્ધ ॥ ૧॥

નમદાખણ્ડલશેખર ધૃતમન્દર એ ।
સન્તતજગદાધાર ॥ ૨॥

હેમનયનસંહારણ ખલદારણ એ ।
ભુવનાનન્દ મુકુન્દ ॥ ૩॥

કનકકશિપુતનુધર્ષણ ઘનકર્ષણ એ ।
ધૃતજગતીવરભાર ॥ ૪॥

ચરણસલિલકૃતપાવન બટુ વામન એ ।
અજિનદણ્ડધર દેવ ॥ ૫॥

ક્ષત્રિયવંશનિકન્દન ભૃગુનન્દન એ ।
કરકોદણ્ડકુઠાર ॥ ૬॥

વિહિતસુજનસમ્ભાવન જિતરાવણ એ ।
　　રઘુકુલકમલદિનેશ ॥ ૭॥

મુરચાણૂરવિનાશક રિપુશાસક એ ।
　　સિન્ધુસુતાસઞ્ચાર ॥ ૮॥

વેદવિહિતવિધિખણ્ડન સુરમણ્ડન એ ।
　　દનુજભેદકર દેવ ॥ ૯॥

યવનવિદારણ દારુણ હયવાહન એ ।
　　ધૃતકરવાલ કરાલ ॥ ૧૦॥

શ્રીજયદેવવિધાયક યુતશાયક એ ।
　　કુરુ કુશલં પ્રણતેષુ ॥ ૧૧॥

## અષ્ટપદી ૨ ગીતં દ્વિતીયમ્

વન્દેઽરવિન્દ નયનામ્બુદાભ કમનીય મૂર્તિધર પદ્મનાભ ॥ ૧॥

કોદણ્ડ-કલા-કૌતુક-નિધાન પાખણ્ડ-વિખણ્ડન ગરુડયાન ॥ ૨॥

કલ્પાન્તકોલ કરુણાવતાર કલ્યાણ કમઠકૃત કર્ણધાર ॥ ૩॥

માયાવિલાસ નાનારૂપ કુન્દામદશન જયદેક ભૂપ ॥ ૪॥

રાજાધિરાજ વીરાધિવીર રણકર્મકુશલ બલગુણગભીર ॥ ૫॥

ત્રિશિર ખર દૂષણ દૂષણાન્ત અજ નિર્વ્યલીકગોતીત કાન્ત ॥ ૬॥

બ્રહ્માદિ દેવગણ પૂજ્યપાદ વિભ્રાજ્યમાન વિસ્મિત વિષાદ ॥ ૭॥

જયદેવ ભણિતમય શસ્ત્રવર્મ વિદધાતુ સદા પ્રણતેષુ શર્મ ॥ ૮॥

## અષ્ટપદી ૩ ગીતં તૃતીયમ્

રમ્યબાલરૂપં રામમભિરામમહમીડે ।
રાવણાભિભવપરિતપ્તસુરસિદ્ધગણયાચિતં જયતિ વરમીડે ॥ ૧॥

ઇન્દ્રનીલાભતનુમતનુશતકોટિરુચિમિન્દુમુખચન્દ્રમુરહારમ્ ।
કૌસ્તુભામુક્તકન્ધરમરુણપાણિપદમમ્બુરુહનયનમલિતારમ્ ॥ ૨॥

કમ્બુનિભકણ્ઠમતિનીલચિકુરાવલીવિજિત જલબાહસઙ્ઘાતમ્ ।
ગૂઢતરજત્રુમાજાનુભુજદણ્ડધરમુરસિ ભૃગુચરણજલજાતમ્ ॥ ૩॥

વિવિધમણિચિત્રહેમાડભરણભુષિતં હેતિસંવિહિતજયગાનમ્ ।
મન્દમન્દસ્મિત બન્ધુવિપાડધરે પઙ્ગામિત્રચરયાનમ્ ॥ ૪॥

કનકમયપટ્ટમણ્ડિતલલાટસ્થલં કુન્દકુન્કુમાભરદભાસમ્ ।
રુચિરમખસૂત્રભૃતમિન્દિરાસઙ્કુલં પીતકૌશેયશુભવાસમ્ ॥ ૫॥

સુખદનાસાપુટં શીલકરુણાકરં સખ્યસઙ્કલ્પમહિતલ્પમ્ ।
દાનવાનનીકમતેભપઞ્ચાનનં વિહિતપલદિવસયુગકલ્પમ્ ॥ ૬॥

કોશલાધીશજાયાદિશિશુશોકહરમદ્ભુતં વીક્ષ્ય કૌસલ્યા ।
અવદદિતિ રૂપમધુના જહિહિ કેશવ ત્રાહી મામપગતશલ્યા ॥ ૭॥

પઠતિ યા જ્ઞાનમજ્ઞાનતિમિરાપહં વૈષ્ણવં ત્રિજગદતિસારમ્ ।
ભાવુકં ચારુ જયદેવકવિનિર્મિતં યાતિ ભવસિન્ધુપરપારમ્ ॥ ૮॥

## અષ્ટપદી ૪ ગીતં ચતુર્થમ્

રામવદનમતિમઞ્જુ વિલોકય ।
શારદ-કોટી-શશિનમિવ નિર્મલમક્ષીચકોરં રોપય ॥ ૧॥

ભૃકુટિ-કુટિલ-ધનુર્વલિતં નવકુઙ્કુમ-તિલકલલાટમ્ ।
સુહૃય-હૃદય-વિશોકકરં કરુણામય-નયન-વિપાટમ્ ॥ ૨॥

ક્ષીરપયોનિધિ-વીચિવિનિન્દક-વિશદમનોહર-હાસમ્ ।
કુન્દકુસુમ-કમનીયલસદ્રશનાવલિ-કિરણ-વિકાશમ્ ॥ ૩॥

નાગલતારસ-રાગધરાધર-પલ્લવમયહૃદિ-હાસમ્ ।
કીરમુખાકૃતિ ધીરસુગન્ધ-સમીકરણ-નાસાવાસમ્ ॥ ૪॥

નાનારત્ન-વિચિત્ર-હિરણ્મય-મુકુટ-વિભાગમતોલમ્ ।
મકરાકાર-કનકકુણ્ડલ-યુગ-ચલન-વિભાસિ-કપોલમ્ ॥ ૫॥

કમ્બુ-રુચિરતર કણ્ઠમૃદમ્બુનીલ-વિજૃમ્ભિતકેશમ્ ।
રઘુકુલ-કૈરવ-કાનન-નિયત વિકાશક-ચારૂ-નિશેશમ્ ॥ ૬॥

મઙ્ગલમોદકરં સુચિરં નિજભક્તસતામનુકુલમ્ ।
લોકચતુર્દશ-પાલનદક્ષમપક્ષવિનાશમતુલમ્ ॥ ૭॥

શ્રીજયદેવકવેરિદમુદયતિ હરિચરણસ્મૃતિસારમ્ ।
સુખયતુ સાધુજનં સતતં કિલ શમયતુ વિષયવિકારમ્ ॥ ૮॥

## અષ્ટપદી ૫ ગીતં પઞ્ચમમ્

રામચન્દ્ર કરકમલમુદારમ્ ।
ભજ ભજનીયમમલમતુલિતરુચિ દમિતદનુજપરિવારમ્ ॥ ૧॥

ધૃતકોદણ્ડવિશિખમણિભૂષણમરુણમનોહરવેષમ્ ।
ભાગધેયસૂચકવિશુદ્ધતરવિવિધવર્ણશુભરેખમ્ ॥ ૨॥

સ્ફુરદઙ્ગુલિનખરાજિવિરાજિતમમરનિકરકૃતરાગમ્ ।
મુક્તાદલભૂષિતદલસઙ્કુલસરસિજમિવ વરભાગમ્ ॥ ૩॥

વરમભીષ્ટમભયં દદદદ્ભુતમાજિકલાસુપવનિમ્ ।
અરિષડ્વર્ગમધુપમદગઞ્જનમનુપમમઞ્જનહીનમ્ ॥ ૪॥

ધર્માદિકફલનમિતમહર્નિશમજશઙ્કરમુનિગીતમ્ ।
કમલાપાણિકનલલાલિતતતમમસુરવિઘાતવિનીતમ્ ॥ ૫॥

કપિલાદિકસનકાદિનિષેવિતમશુભશમનમતિભારમ્ ।
વેદપુરાણસકલસમ્મતમિવ સાદિતવિષમવિકારમ્ ॥ ૬॥

ચિન્તામણિસુરધેનુકલ્પતરુકોટિદાનગુણશીલમ્ ।
પ્રાકૃતતત્ત્વપ્રપઞ્ચરોગહરમખિલચરાચરલીલમ્ ॥ ૭॥

શ્રીજયદેવભણિતમતિમઞ્જુલમધુરમનોહરગાનમ્ ।
દિશતુ સદામઙ્ગલમતુલિતમિતિ પરમાનન્દનિધાનમ્ ॥ ૮॥

ઇતિ શ્રીમદ્રામગીતગોવિન્દે મહાકાવ્યે શ્રીજયદેવકૃતૌ
સાનન્દરઘુનન્દનો નામ પ્રથમ સર્ગઃ ।

## દ્વિતીયસર્ગઃ ૨ વિજિતપરશુરામો

## અષ્ટપદી ૬ ગીતં ષષ્ઠમ્

પ્રણમામિ રામમનુત્તમં મનુવંશકઞ્જરવિમ્ ।
કન્દર્પકોટિસમાન-સુન્દરરૂપમાદિકવિમ્ ॥ ૧॥

બ્રહ્માભિધાનમલેપમજમદ્વૈતમપ્રલયમ્ ।
સદ્રૂપવન્તમબાધિકં ચિન્માત્રમમ્બુશયમ્ ॥ ૨॥

સત્યસ્વરૂપમમેયમક્ષરમપ્રપઞ્ચગતમ્ ।
અવ્યક્તમપ્રતિમં નિરીહમખણ્ડમીશમતમ્ ॥ ૩॥

સ્મૃતિવેદહરશઙ્ખાડસુરપ્રતિઘાતદક્ષતરમ્ ।
ક્ષીરોદમથનમહાગમન્દરપૃષ્ઠભાગધરમ્ ॥ ૪॥

ઉત્તુઙ્ગરદશિખરેણ ચાયતભૂમિતૂલકરમ્ ।
પ્રલ્હાદપાલકમસુરકાલકમભ્રભેદધરમ્ ॥ ૫॥

કોદણ્ડબાણકુઠારકરતલમખિલબાહુજહમ્ ।
સાકેતભૂપતિનન્દનં સત્યાદિબાહુવહમ્ ॥ ૬॥

જલદાભમિન્દુનિભાનનં કિઞ્જલ્કપાતપટમ્ ।
મણિચિત્રહેમકિરીટભૂષિતચારુભાલતટમ્ ॥ ૭॥

ઇતિ પઠતિ યો રઘુવીરવર્ણનમુજ્જ્વલં સુચારમ્ ।
જયદેવનિર્મિતમિત્યનૂપમમેતિ મોદભરમ્ ॥ ૮॥

## અષ્ટપદી ૭ ગીતં સપ્તમમ્

જયતિ વિદેહનગરમનુરૂપમ્ ।
દિશીદિશી રાજમાનચામીકરરચિતવિવિધમણિયૂપમ્ ॥ ૧॥

રુચિરલતાતરુસુમનવાટિકાવાપીકૂપતડાગમ્ ।
વપ્રવલયપરિખાવૃતમભિનવચિત્રમુદયદનુરાગમ્ ॥ ૨॥

શેષભયઙ્કરવેશનૃપતિદુર્ધર્ષમહેશપિનાકમ્ ।
મણિમયસૌધસમૂહમુદગ્રમરુચ્ચલવિશદપતાકમ્ ॥ ૩॥

તોરણનિકરકિરણસઞ્ચારવિનિન્દિતસુરપતિચાપમ્ ।
આહુતિગન્ધસહિતમખધૂમવિધૂતસકલજનપાપમ્ ॥ ૪॥

ગજરથતુરગપદાતિવિઘટ્ટવિશૃઙ્ખલશબ્દમુદારમ્ ।
શારદવિધુસઙ્કાશવિકાશકનકકલશાશ્રિતતારમ્ ॥ ૫॥

પણ્ડિતસુમતિસુશીલસુધર્મસુકર્મમનુજપરિવારમ્ ।
પતિપદપદ્મનિહિતનિજચિત્તચતુરસુન્દરપુરદારમ્ ॥ ૬॥

સુખદવિતાનમનેકતપોધનભૂષિતમતિશયલોભમ્ ।
પઙ્કજયોનિવિનિર્મિતમિવકૃત સન્તતમાનસલોભમ્ ॥ ૭॥

શ્રીજયદેવકવેરુદિતં મિથિલાપુરગીતમશોકમ્ ।
મઙ્ગલમોદભરેણ કરોતુ સદામુદિતં જનલોકમ્ ॥ ૮॥

## અષ્ટપદી ૮ ગીતમષ્ટમમ્

પરશુરામમવલોક્ય સકોપમ્ ।
રઘુપતિરભિજહર્ષ યુગબાહુવિહિતબહુબાહુજલોપમ્ ॥ ૧॥

ભૃકુટીકુટિલમરુણવદનં રદખણ્ડિતરદપરિધાનમ્ ।
દધતમિવ દ્યુમણિં શશિનં સકુજં સસિતં કૃતમાનમ્ ॥ ૨॥

રુચિરજટામુકુટદ્યુતિપુઞ્જવિભાસિમનોહરભાલમ્ ।
પાણિસરોજનિહિતશરચાપકુઠારમતીવકરાલમ્ ॥ ૩॥

એકકવિંશતિવારમહાવિજયસ્ફુટશં ગજલેખમ્ ।
ભૂતિવિભૂષિતવિગ્રહભાગમનૂપમરૂપમશષેમ્ ॥ ૪॥

લલિતસુમેરૂવલયપરિવીતમુમાપતિશિષ્યમુદારમ્ ।
ચન્દ્રવિશદમખતન્તુસમેતમલિપ્રભનિશ્ચલતારમ્ ॥ ૫॥

અસ્ત્રશસ્ત્રસમ્ભૂતમહાવ્રણવક્ષસમાહવધીરમ્ ।
કટિતટયુગલનિષઙ્ગધરં જલવાહકશબ્દગભીરમ્ ॥ ૬॥

શિવશિવમન્ત્રમમું જપમાનમરિક્ષયહેતુમ્ ।
દર્ભપટીમૃગચર્મયુતં ભૃગુવંશમનુત્તમકેતુમ્ ॥ ૭॥

શ્રીજયદેવકવેરુદિતં દ્વિજરાજમહાભટરૂપમ્ ।
પૂરયતુ પ્રણતસ્ય જનસ્ય મનોરથમામનુરૂપમ્ ॥ ૮॥

## અષ્ટપદી ૯ ગીતં નવમમ્

જય રામચન્દ્ર કમલાવિહાર ।
જય કોશલેશ કરૂણાવતાર ॥ ૧॥

રઘુવંશ-કમલ-કાનન-દિનેશ ।
કન્દર્પકોટી કમનીયવેશ ॥ ૨॥

કાલાગ્નિસદૃશકોપાતિરેક ।
ગન્ધર્વગીતપૂરિતવિવેક ॥ ૩॥

રજનીચર-પ્રકર-વિપિનદાવ ।
વેદાન્તવેદગણભણિતભાવ ॥ ૪॥

વાગીશ સર્વવિદ્યાવિચાર ।
બ્રહ્માદિવન્દ્ય હૃતભૂમિભાર ॥ ૫॥

મદમોહકામ-પન્નગખગેશ ।
શરદિન્દુનિભાનન કુટિલકેશ ॥ ૬॥

તડિદાભવસન રમણીયહાસ ।
કુન્દાભદશન માયાવિલાસ ॥ ૭॥

જયદેવ વિનયમતિશયમવેહિ ।
નિજચરણકમલમધુમેવ દેહિ ॥ ૮॥

ઇતિ શ્રીમદ્રામગીતગોવિન્દે મહાકાવ્યે શ્રીજયદેવકૃતૌ
વિજિતપરશુરામો નામ દ્વિતીયઃ સર્ગઃ ।

## તૃતીયસર્ગઃ ૩ જગન્નિવાસઃ

## અષ્ટપદી ૧૦ ગીતં દશમમ્

શ્રીરામરૂપમનૂપમં પશ્યામિ તાપહરમ્ ।
જલેન્દ્રનીલમણિ પ્રભં શરદિન્દુવક્ત્રધરમ્ ॥ ૧॥

કનકાસને મણિમણ્ડપે સપરિચ્છદેઽધિગતમ્ ।
જનકાઽધિરાજસુતાસમેતમશેષયોગિમતમ્ ॥ ૨॥

ચપલાવિભૂષિતસજલજલધરમિવ મનોહરણમ્ ।
કિઞ્જલ્કપાતદુકૂલસઙ્કુલમિન્દિરારમણમ્ ॥ ૩॥

કેયૂરકુણ્ડલમુકુટકઙ્કણમુદ્રિકારુચિરમ્ ।
મુક્તાભરદનમનઙ્ગસુન્દરમઙ્ગુલીરુચિરમ્ ॥ ૪॥

વિદ્યાવિચારણદક્ષમચ્છમપક્ષપક્ષકરમ્ ।
કલ્યાણભાજનમીશ વન્દિતમીતિશરમ્ ॥ ૫॥

આજાનુબાહુમુદારવિક્રમમર્કકોટિરુચમ્ ।
નિઃશેષલક્ષણલક્ષણીયમપાસ્તરોગશુચમ્ ॥ ૬॥

મન્દારમલ્લીકુન્દતુલસીદામસંવલિતમ્ ।
શ્રીવત્સાચિહ્નિતવક્ષસં સ્વર્ણોપવીતચિતમ્ ॥ ૭॥

જયદેવભાષિતમષ્ટપદમંહોનિરાશપરમ્ ।
શ્રેયો દિશત્વખિલં જનાય નિજાય લોકવરમ્ ॥ ૮॥

## અષ્ટપદી ૧૧ ગીતમેકાદશમમ્

સખે સાનુરાગં ભજતુ રઘુવીરપદમેકમ્ ।
સર્વસૌભાગ્યસમ્પત્તિસન્દેહકરમિન્દુશતકોટિરુચિસેકમ્ ॥ ૧॥

કેતુદમ્ભોલિરેખાઙ્કુશચ્છત્રવરચિહ્નમમ્ભોજહારમ્ ।
બ્રહ્મવાગીશસનકાદિમુનિસેવિતં વેદવેદાન્તમતસારમ્ ॥ ૨॥

નમ્રદિક્પાલગણ મૌલિમણિમાલિકાકાન્તિવિસ્તરણમતિશોભમ્ ।
સિદ્ધવિદ્યેશયક્ષેશવિનાશવસુતુષિતગન્ધર્વકૃતલોભમ્ ॥ ૩॥

પૂરિતાનન્દકામારિશિરસિ સ્ફુરદ્વિમલગઙ્ગૌઘજટસિક્તમ્ ।
શાપવશગૌતમીપાપપરિણામહરમરુણમુદ્યોતદ્યુતિરક્તમ્ ॥ ૪॥

અઞ્જનીનન્દનપ્રેમકાસારસરસીરુહં યોગિગણયત્નમ્ ।
ઇન્દિરાપાણિપાથોજવરલાલિતં સદ્વૃત્તપાવનં નિપુણરત્નમ્ ॥ ૫॥

વિપુલવિસ્તારસંસારસાગરતરણશરણશુભકલ્પદૃઢનાવમ્ ।
કામમદમોહલોભદિકાનનમહાવિધવિષમતમદાવમ્ ॥ ૬॥

દર્શનાદેવ લોકર્તિશોકાપહં રાક્ષસાભિભવમભિરામમ્ ।
કામતરુકામમણિકામધુક્કોટિગુણદાનકરપરમવિશ્રામમ્ ॥ ૭॥

જયતિ ગમ્ભીરજયદેવકવિભારતી પુણ્યદા શમિતપરિતાપા ।
રાજરાજેન્દ્ર રઘુવીરચરણામ્બુજસ્મરણશુભકરણગતપાપા ॥ ૮॥

## અષ્ટપદી ૧૨ ગીતં દ્વાદશમ્

વિહરતિ હરિરિહ સરયૂકૂલે ।
પદ્મરાગચામીકરમરકતબદ્ધવિવિધતરુકુલે ॥ ૧॥

સાદરમજ્જદમિતયુવતીકુચકુઙ્કુમપિઙ્ગલનીરે ।
શમદમાદિસાધનવિવેકવશમુનિજનસઙ્કુલતીરે ॥ ૨॥

વિલિખિતમકરનિશાકર દિનકરચઞ્ચલ વિશદપતાકે ।
દિવ્યાસનવિશેષપૂરિતદૂરીકૃતદુરિતવિપાકે ॥ ૩॥

સારસજલકોયષ્ટિમરાલકચક્રવિજૃમ્ભિતનાદે ।
પઙ્કરુહકેદારવિબોધનપરિમલશમિતવિષાદે ॥ ૪॥

યાતાયાતતુરઙ્ગમતઙ્ગજકરભમનુજરથયાને ।
દિશિદિશિ નિજવિશ્રામકામબહુવિરચિતરુચિરવિતાને ॥ ૫॥

રાજદનેકલવઙ્ગલતાવલીમુનિપાદપચૂતે ।
ભ્રાજિતતુરગતરઙ્ગવિકાશલસત્તુલસીદલપૂતે ॥ ૬॥

દેવગૃહૈરભિતઃ સ્ફુરતિ પ્રણવાદિકમન્ત્રવિચારે ।
ધ્યાનપરાયણસિદ્ધસમૂહ-નિરાકૃતવિષયવિકારે ॥ ૭॥

શ્રીજયદેવકવેરુદિતં સરયૂસરિદુજ્જ્વલગાનમ્ ।
સર્વસતામનિશં ભવતુ પ્રિયદં સુખમોદનિધાનમ્ ॥ ૮॥

## અષ્ટપદી ૧૩ ગીતં ત્રયોદશમ્

શ ૃણુ મમ વચનમિદં નૃપભૂષણ
સત્યસિન્ધુવિધ્વાહતદૂષણ ।
દેહિ વરં નાથ જહિ ન ધર્મપથમ્ ॥ ૧॥

દેવાસુરરણમધ્યસલીલમ્ ।
ભઙ્ગમગમદુત્તમરથકોલમ્ ॥ ૨॥

નિજકરમર્પ્ય તત્ર ધૃતશાયક ।
દત્ત વિજયયશસ્ત્વયિ નાયક ॥ ૩॥

સમયમવાપ્ય વદતિ વિજ્ઞાની ।
તસ્માદિહિ ન નિનિન્દિતવાની ॥ ૪॥

કુરુ ભરતં કોશલપુરનાથમ્ ।
રઘુપતિરેતુ વિપિનમુનિગાથમ્ ॥ ૫॥

ન તુ તવ ધર્મહાનિ ન હિ પાપમ્ ।
તામુપનયતિ સહિતમહિતાપમ્ ॥ ૬॥

આકલય્ય ભૂપતિરિપુકલ્પમ્ ।
મનસિ ચકાર જીવસઙ્કુલ્પમ્ ॥ ૭॥

શ્રીજયદેવકરચિતરહસ્યમ્ ।
સાધુજનસ્ય તનોતુ યશસ્યમ્ ॥ ૮॥

## અષ્ટપદી ૧૪ ગીતં ચતુર્દશમ્

પશ્ય પશ્ય રઘુવીર પ્રયાગમ્ ॥

મજ્જદખિલમુનિગણમતિરાગમ્ ।
સીતયા સહ સન્તતમેતમ્ ॥ ૧॥

નીલપીતાસિતચિત્રપતાકમ્ ।
સુખસમૂહશિથિલીકૃતનાકમ્ ॥ ૨॥

સિંહાસનપરિપૂરિતકૂલમ્ ।
જ્ઞાનયોગજપસાધનમૂલમ્ ॥ ૩॥

વાણીજન્હુતરણિજાસઙ્ગમ્ ।
નિમિષાદેતિ કલુષમતિભઙ્ગમ્ ॥ ૪॥

ઉપવનવનભૂષિતમહિદેશમ્ ।
સકલકલાકલ્પિતશુભવેશમ્ ॥ ૫॥

મનુજાકારસુરાસુરનાગમ્ ।
વિહિતનૃપતિતાપસવરયાગમ્ ॥ ૬॥

મુક્તિચતુર્વિધસુલભમનૂપમ્ ।
રાજમાનનાનામણિયૂપમ્ ॥ ૭॥

શ્રીજયદેવભણિતમિતિ ગીતમ્ ।
સુખયતુ રામચરણમુપનીતમ્ ॥ ૮॥

ઇતિ શ્રીમદ્રામગીતગોવિન્દે મહાકાવ્યે શ્રીજયદેવકૃતૌ
જગન્નિવાસો નામ તૃતીયઃ સર્ગઃ ।

## ચતુર્થસર્ગઃ ૪ લઙ્કાપ્રવેશો

## અષ્ટપદી ૧૫ ગીતં પઞ્ચદશમ્

ચિત્રકૂટમવલોકય સીતે ।
ઉન્નતશિખરલિખિતઘનમણ્ડલમઙ્ગલકરણવિનીતે ॥ ૧॥

મન્દાકિનીપ્રવાહવિલઙ્ઘનચઞ્ચલપક્ષમરાલમ્ ।
વિકસિતકુન્દલવઙ્ગતાલવલીસરસીરુહમાલમ્ ॥ ૨॥

ચમ્પકભૂર્જકદમ્બતમાલમુનિદ્રુમભૂષિતમાગમ્ ।
વૈરવિહીનમતઙ્ગજસિંહમયૂરમહાવિષનાગમ્ ॥ ૩॥

સ્ફટિકપદ્મરાગેન્દ્રનીલમણિહારકગૈરિકશોભમ્ ।
શીતલધીરસુગન્ધસમીરણમૃષિજનમાનસલોભમ્ ॥ ૪॥

ગવયશરભહરિણીહરિણાદનકપિકુલવિપુલવિહારમ્ ।
ઇન્ધનદલફલકુસુમદર્ભજલહેતુકમુનિસઞ્ચારમ્ ॥ ૫॥

શુકહારીતચકોરશારિકાખઞ્જનકોકવિરાવમ્ ।
નિર્ઝરશરણસલિલશીકરમરવિગતવિષમતરૂદાવમ્ ॥ ૬॥

ગુહાનિવાસકિરાતહૂણખસવિરચિતવિટપવિતાનમ્ ।
વનદેવીસસતાલસુસુરરસશ્રુતિકૃતમઙ્ગલગાનમ્ ॥ ૭॥

શ્રીજયદેવમહાકવિનિર્મિતમદ્ભુતભૂધરગીતમ્ ।
હરતુ મલં સકલં પઠતામનિશં પ્રકરોતુ વિનીતમ્ ॥ ૮॥

## અષ્ટપદી ૧૬ ગીતં ષોડશમ્

દણ્ડકવનમતિચારુ ચકાશે ।
શારદેન્દુનિર્મલરુચિરઘુપતિ યશસિ જગતિ સવિકાશે ॥ ૧॥

નિર્ભયકુમ્ભજદિનાનામુનિજનકૃતસાધનયેઆગમ્ ।
વિગતવૈરમૃગદસ્યુખગાદિબલાહકદાવવિયોગમ્ ॥ ૨॥

ગોદાતરલતરઙ્ગવિચિત્રિતરુચિરકૂલકૃતશાલમ્ ।
વિહિતનિવાસવિદેહસુતારઘુનાથસુમિત્રાબાલમ્ ॥ ૩॥

ખણ્ડિતકામસમાકુલશૂર્પણખાશ્રુતિકરણવિનાસમ્ ।
ખરદૂષણરજનીચરસહિતસહસ્રચતુર્દશનાશમ્ ॥ ૪॥

રાવણશાસનકનકહરિણમારીચનિપાતનિધાનમ્ ।
સીતાહરણવિલાપનગૃધ્રવિલોકનસઙ્ગતિદાનમ્ ॥ ૫॥

યોજનબાહુકબન્ધમહાસુરમારણપાવકસઙ્ગમ્ ।
નવધાભક્તિવિવેકવિચારણશબરીસંસૃતિભગમ્ ॥ ૬॥

નારદમુનિદર્શનવિધિસન્તતરુચિરકલધ્વનિગીતમ્ ।
પમ્પાનિકટસમીરતનયસંવાદવિશેષમભીતમ્ ॥ ૭॥

શ્રીજયદેવકવેરુદિતં દણ્ડકવનચરિતમનૂપમ્ ।
યચ્છતુ મુક્તિપદં વિમદં સુચિરં રુચિરં શુભરૂપમ્ ॥ ૮॥

## અષ્ટપદી ૧૭ ગીતં સપ્તદશમ્

શ્રીરામનામ મનોરમં ભજામૃતતત્ત્વમયમ્ ।
નતનોતિ યત્સ્મરણેન જન્મજરાધિમરણભયમ્ ॥ ૧॥

સુકૃતેઃ પરં પ્રકૃતેઃપરં સત્ત્વાદિભાવગતમ્ ।
વિશ્રામમેકમનોગિરામજ શઙ્કરાભિમતમ્ ॥ ૨॥

પ્રલ્હાદનારદપુણ્ડરીકપરાશરાદિનુતમ્ ।
સંસારસાગરસુપ્લવં મન્ત્રાધિમન્ત્રયુતમ્ ॥ ૩॥

યદિ ભજસિ હરિમપિ કેવલં હૃદિ કર્મણા વચસા ।
યોગેન કિં યજ્ઞેન કિં હ્યપરેણ કિં તપસા ॥ ૪
ઉદ્ગીથરમ્યપદક્રમોપનિષત્સુગીતપરમ્ ।

શબરીજટાયુરજામિલાદિકતાપપાપહરમ્ ॥ ૫॥

રાગાદિદૂરમશેષમુનિજનસેવિતં સતતમ્ ।
લોકાભિરામમમાનમાનસમઞ્જસાવિતતમ્ ॥ ૬॥

બ્રહ્માણ્ડસમ્પુટરત્નમુજ્જ્વલમકલમપ્રલયમ્ ।
સર્વાશ્રયં સર્વાતિગં સર્વાર્તિહં ચ સમમ્ ॥ ૭॥

તૃષ્ણાનિવિડરજનીદિવાકરમસુરયૂથભિદમ્ ।
જયદેવભાષિતમમદ્ભુતં ભવસારભૂતમિદમ્ ॥ ૮॥

## અષ્ટપદી ૧૮ ગીતમષ્ટાદશમ્

લઙ્કાપુરમવલોક્ય કરાલમ્ ।
નાનાભટપરિપૂરિતશાલમ્ ।
સ્મૃત્ય વિભું વાતસુતો ન ચકાર ભયમ્ ॥ ૧॥

બહુવિધલોહયન્ત્રશૃઙ્ગબાણમ્ ।
દૌવારિકધૃતપાણિકૃપાણમ્ ॥ ૨॥

રુચિરનિકેતનતોરણમાલમ્ ।
ભ્રાજમાનમણિવિરચિતજાલમ્ ॥ ૩॥

શુભસોપાનવાપિકારમ્યમ્ ।
સુરતરુભૂષિતવિપિનમગમ્યમ્ ॥ ૪॥

સન્તતમસુરનિકરસઞ્ચારમ્ ।
કીલિતલોકપાલસુરદારમ્ ॥ ૫॥

તુઙ્ગકનકમયસૌધવિકાશમ્ ।
મયનિર્મિતમગપતિસઙ્કાશમ્ ॥ ૬॥

અતિશયરુચિરદેવવરગેહમ્ ।
દેવવિનિર્મિતનિરૂપમગેહમ્ ॥ ૭॥

શ્રીજયદેવવિનિર્મિતગાનમ્ ।
સુખયતુ સાધુનિચયમનુમાનમ્ ॥ ૮॥

ઇતિ શ્રીમદ્રામગીતગોવિન્દે મહાકાવ્યે શ્રીજયદેવકૃતૌ
લઙ્કાપ્રવેશો નામ ચતુર્થઃ સર્ગઃ ।

# પઞ્ચમસર્ગઃ ૫ લઙ્કાવિજયો

## અષ્ટપદી ૧૯ ગીતમેકોનવિંશમ્

રજનીચરરમણીપરિવીતા ।
બાલચન્દ્રકલિકેવ સમીતા ।
નાથ હરે સીદતિ સીતાઽશોકવને ॥ ૧॥

કૃશશરીરગતિરતિશયદીના ।
ભૂમિશયાશનસલિલવિહીના ॥ ૨॥

ધ્યાયતિ તવ મુખચન્દ્રમુદારમ્ ।
ત્યજતિ ભુજગમિવ મણિમયહારમ્ ॥ ૩॥

ભજતિ નિશેષકિરણમિવ જાલમ્ ।
સ્પૃશતિ કરેણ મુહુર્નિજભાલમ્ ॥ ૪॥

કલયતિ શરમિવ મલયસમીરમ્ ।
મુઞ્ચતિ તપ્તવિલોચનનીરમ્ ॥ ૫॥

વિરહતયા વિદધાતિ ન હાસમ્ ।
જનયતિ વન્હિવિષમનિશ્વાસમ્ ॥ ૬॥

રામરામરામેતિ સકામમ્ ।
વદતિ વિલાપતયા વસુયાભમ્ ॥ ૭॥

શ્રીજયદેવકવેરિદમુદિતમ્ ।
મુખયતુ રામભક્તમતિમુદિતમ્ ॥ ૮॥

## અષ્ટપદી ૨૦ ગીતં વિંશમ્

પશ્ય પશ્ય રઘુવર વરસેતુમ્ ।
પરમદુરાસદરૂપપયોનિધિસલિલાવલઙ્ઘનહેતુમ્ ॥ ૧॥

શૈલનિવહમાનીય સુમનમિવ શતયોજનપરિમાણમ્ ।
નાનાકારશરીરવલીમુખવીરાવિહિતનિર્માણમ્ ॥ ૨॥

વાલિતનયસુગ્રીવવાયુસુતનલનીલાદિવિચારમ્ ।
શઙ્ખભુજગતિમિમકરચક્રકુલસઙ્કુલમતિવિસ્તારમ્ ॥ ૩॥

અઞ્જનનીલનીરનિધિમધ્યગમુજ્જ્વલફેનવિકારમ્ ।
છાયાપથમિવ ગગનસભુદ્ધતમુડુગણમિલિતમુદારમ્ ॥ ૪॥

ઋક્ષમલ્લબહુરાજિવિરાજિતમિન્દુકિરણસમરૂપમ્ ।
લઙ્કાવિજયપત્રમર્પિતમિવ વિધિના વિપુલમનૂપમ્ ॥ ૫॥

સિદ્ધયક્ષવિદ્યાધરકિન્નરસુરવરલોચનલોભમ્ ।
યાતુધાનરમણીજનલોચનરોદનમભિગતશોભમ્ ॥ ૬॥

વાલખિલ્યવૈખાનસફેનપવનચરમુનિકૃતજાપમ્ ।
રાજમાનરાકેયદૂરકૃતદારુણબન્ધનપાપમ્ ॥ ૭॥

પઠતિ જનઃ સુચિરં સુમતિર્જયદેવવિનિર્મિતગીતમ્ ।
પશ્યતિ નૈવ કદાચિદપિ પ્રતિબન્ધકસંસૃતિભીતમ્ ॥ ૮॥

## અષ્ટપદી ૨૧ ગીતમેકવિંશમ્

લઙ્કાપતિરાલોકયદીશમ્ ।
ઇન્દીવરસમરુચિરવિલોચનમરિમદમોચનકીશમ્ ॥ ૧॥

રાકાપતિશતકોટિમઞ્જુમુખમનુપમચિબુકલસન્તમ્ ।
ભૃકુટીકુટિવિલાસતયારતિનાયકચાપહસમ્તમ્ ॥ ૨॥

કરકોદણ્ડશરપ્રભયા લસમાનસમસ્તશરીરમ્ ।
શક્રસમર્પિતવર્મભૃતં સમરાબ્ધિવિલઙ્ઘનધીરમ્ ॥ ૩॥

બદ્ધજટામુકુટં નિબિડં રજનીચરનાશનદક્ષમ્ ।
ચારુરથસ્થમુદગ્રપતાકમખડિતરોષવિપક્ષમ્ ॥ ૪॥

કાલનીયપશમં ખલહં કલહં કરદારુણમેતમ્ ।
માતલિસારથિસહિતમત્તમહિતલનબલેન સમેતમ્ ॥ ૫॥

પરિકરકટિતૂણીરવિભૂષિતમુદ્ગરબાણકરાલમ્ ।
આકમ્પિતતુલસીદલસઙ્કુલકુસુમકલિતવનમાલમ્ ॥ ૬॥

તિષ્ઠ વિમૂઢમતે સમરે દશકણ્ઠમિતિ પ્રવદન્તમ્ ।
પ્રસ્ફુરિતાધરપલ્લવયુગપ્રવિભાસિમનોહરદન્તમ્ ॥ ૭॥

શ્રીજયદેવભણિતમતિમઞ્જુલરઘુવરસમરવિધાનમ્ ।
પઠતિ સમરજયમતિશયપુરજયમેતિ મહાભયદાનમ્ ॥ ૮॥

## અષ્ટપદી ૨૨ ગીતં દ્વાવિંશમ્

જય રામચન્દ્ર માયાઽતિદૂર ।
રવિવંશવિભૂષણ મુકુટશૂર ॥ ૧॥

બ્રહ્મામહેન્દ્રગન્ધર્વગીત ।
કલ્યાણનિપુણ ગુણગણવિનીત ॥ ૨॥

ચણ્ડપ્રયાત ખણ્ડિતવિરાધ ।
સ્વર્ગાપવર્ગદ સરદગાધ ॥ ૩॥

કરુણાનિકેતતમ પ્રબલરોષ ।
ભાવાધિગમ્ય જિતસકલદોષ ॥ ૪॥

ધારાધરપ્રતિમ નીલદેહ ।
સદ્રૂપબોધમયમોદગેહ ॥ ૫॥

વ્યાલાદપત્ર શતપત્રનેત્ર ।
કૂટસ્થ પાણિતલકલિતવેત્ર ॥ ૬॥

સીતાપતિરઘુપતિર્જૈનરુદ્ધ ।
વિશસિતસમસ્તમાયાવિરુદ્ધ ॥ ૭॥

જયદેવવિનિર્મિતમેવ રામ ।
કુરુ તેન નાથ મમ હૃદયધામ ॥ ૮॥

ઇતિ શ્રીમદ્રામગીતગોવિન્દે મહાકાવ્યે શ્રીજયદેવકૃતૌ
લઙ્કાવિજયો નામ પઞ્ચમઃ સર્ગઃ ।

## ષષ્ઠસર્ગઃ ૬ રામાભિષેકઃ

## અષ્ટપદી ૨૩ ગીતં ત્રયોવિંશમ્

પશ્યત રામચન્દ્રમતિશોભમ્ ।
વિધિહરિહરદિનનાથનાકપતિમુનિગણમાનસલોભમ્ ॥ ૧॥

નીલશકલસનિમશરીરરુચિશુક્તિસુવિદ્રુમહારમ્ ।
વામભાગસીતાશુભશોભિતમનુગતહરિપરિવારમ્ ॥ ૨॥

ભાનુસમાનપુષ્પરથસઙ્ગતમનુજસહિતમસુરઘ્નમ્ ।
ચણ્ડવિશિખકોદણ્ડવિનાશિતસકલચરાચરવિઘ્નમ્ ॥ ૩॥

મરતાલિઙ્ગનગુરુપાદામ્બુજપ્રણતિવિકમ્પિતભાલમ્ ।
દ્વિજનતિકરણવિધાનપરસ્પરપૃચ્છં ચલવનમાલમ્ ॥ ૪॥

માતૃભવનકૃતગમનમનિન્દિતમણિમયપીઠનિવાસમ્ ।
ચામરયુગલસિતાતપવારણમણ્ડિતમઞ્જુલહાસમ્ ॥ ૫॥

હસદુકૂલપુઞ્જમુકુટપ્રભયાપ્રતિમાસિકપોલમ્ ।
નિજજનમુપરિકૃપામયશુભ્રકટાક્ષનિવેશનલોલમ્ ॥ ૬॥

બન્દિવેષધરવેદચતુષ્ટયવિહિતવિજયગુણગાથમ્ ।
કનકરત્નમયપાણિવિશેષકૃતાખિલલોકસનાથમ્ ॥ ૭॥

શ્રીજયદેવવિનિર્મિતમતિશયરઘુપતિચરિતમનૂપમ્ ।
હરિચરણસ્ય તનોતુ શિવં હૃદિ માનસહંસસરૂપમ્ ॥ ૮॥

## અષ્ટપદી ૨૪ ગીતં ચતુર્વિંશમ્

જહિહિ શયનમરવિન્દવિલોચન ખગકેતો ।
કરુણાપૂરિત શુભનયનેન વિલોકય મઙ્ગલહેતો ॥ ૧॥

ઉદયતિ ભાનુરયં વિધુના સમમેતિ સમસ્તતમિસ્રમ્ ।
દધતિ નભોરુણતામરુણરુણેન બભૂવ સદોજસમિશ્રમ્ ॥ ૨॥

વિકસતિ પદ્મવનં સકલં વિહગાવલિદાતિનિનાદમ્ ।
હંસવિરાવવિબોધિતચક્રનિચપગતસર્વવિષાદમ્ ॥ ૩॥

દીપશિખાતિવિશુદ્ધતરા મલિનત્વમુપૈતિ વિશાલા ।
સીદતિ કુમુદમુલૂકતતિઃ પ્રતિગચ્છતિ લયમુડુમાલા ॥ ૪॥

કર્ષતિ શ્રૃઙ્ખલકં ગજતા યુગભાગવિભાજિતનિદ્રા ।
નમતિ મહીપસભાઽભિમુખં તવ રાઘવ દૂરદરિદ્રા ॥ ૫॥

ગાયતિ સામખિલામખિલામૃષિરાજખણ્ડિતવીણા ।
નૃત્યતિ દેવવધૂ રુચિરાયુતભાવભરેણ નવીણા ॥ ૬॥

શીતલમન્દસુગન્ધસમીરગલિતકુસુમાવલિરેખા ।
પઠતિ પરસ્પરમેવ પટુઃ શ્રુતિપાઠમવારિતવેષા ॥ ૭॥

શ્રીકવિરાજશિરોમણિદામલસજ્જયદેવવિગીતમ્ ।
મોદભરં સુજનસ્ય તનોતિ કરોતુ મનો રસનીતમ્ ॥ ૮॥

ઇતિ શ્રીમદ્રામગીતગોવિન્દે મહાકાવ્યે શ્રીજયદેવકૃતૌ
રામાભિષેકો નામ ષષ્ઠઃ સર્ગઃ ।

ઇતિ કવિ જયદેવકૃતં રામગીતગોવિન્દં સમ્પૂર્ણમ્ ।

(Although in the similar form of the more
well-known Gitagovinda by Jayadevapandita,
this composition is by a different Jayadevakavi.

Selected songs were presented at
All India Road, Pune in 2009 with music
by Dr. Keshavchaitanya Kunte.
The audio of the program is available at
https://www.youtube.com/watch?v=Pxg8t3PGCpA
with Marathi/English commentary.

Encoded and proofread by Keshavchaitanya Kunte

*Rama Geeta Govinda*
pdf was typeset on July 9, 2023

Please send corrections to *sanskrit@cheerful.com*